प्रवारणावस्तु

(१४७)
१.१.१३
अनुपलब्ध

१.२.१३
अनुपलब्ध

१.३
अनुपलब्ध

२.१२
अनुपलब्ध

२.३.१
अनुपलब्ध

२.३.२.१.
ततः पश्चात्प्रवारको भिक्षुः संमन्तव्यः. पञ्चभिर्धर्मैः समन्वागतः प्रवारको भिक्षुरसंमतो न संमन्तव्यः. संमतश्चावकाशयितव्यः. कतमैः पञ्चभिः. छन्दाद्गच्छति द्वेषान्मोहाद्भयाद्गच्छति प्रवारणां चाप्रवारणां न जानाति. एभिः पञ्चभिर्धर्मैः (१४८) समन्वागतः प्रवारको भिक्षुरसंमतो न संमन्तव्यः. संमतश्चावकाशयितव्यः. पञ्चभिस्तु धर्मैः समन्वागतः प्रवारको भिक्षुरसंमतः संमन्तव्यः. संमतश्च नावकाशयितव्यः. कतमैः पञ्चभिः. न छन्दाद्गच्छति न द्वेषान्न मोहाद्न भयाद्गच्छति प्रवारणां चाप्रवारणां जानाति. एभिः पञ्चभिर्धर्मैः समन्वागतः प्रवारको भिक्षुरसंमतः संमन्तव्यः. संमतश्च नावकाशयितव्यः.

२.३.२.२.
एवं च पुनः संमन्तव्यः. शयनासनप्रज्ञप्तिं कृत्वा पूर्ववद्यावदुत्साहयितव्यः. उत्सहसे त्वं एवंनामा संघस्य प्रवारणां प्रवारयितुं इति. सचेदुत्सहते तेन वक्तव्यं उत्सहे.

२.३.२.३.१.
ततः पश्चादेकेन भिक्षुणा ज्ञप्तिं कृत्वा कर्म कर्तव्यम्. शृणोतु भदन्ताः संघः. अयं एवंनामा प्रवारको भिक्षुरुत्सहते संघस्य प्रवारणां प्रवारयितुम्. सचेत्संघस्य प्राप्तकालं क्षमेतानुजानीयात्संघो यत्संघ एवंनामानं प्रवारकं संमन्येत. एवंनामा प्रवारको भिक्षुः संघस्य प्रवारणां प्रवारयितुम्. एषा ज्ञप्तिः.

२.३.२.३.२.

एवं च कर्म कर्तव्यम्. शृणोतु भदन्ताः संघः. एवंनामा प्रवारको (१४९) भिक्षुरुत्सहते संघस्य प्रवारणां प्रवारयितुम्. तत्संघ एवंनामानं प्रवारकं भिक्षुं संमन्येत. अयं एवंनामा प्रवारको भिक्षुः संघस्य प्रवारणां प्रवारयिष्यति. येषां आयुष्मतां क्षमत एवंनामानं प्रवारकं भिक्षुं संमन्तुं यदेवंनामा प्रवारको भिक्षुः संघस्य प्रवारणां प्रवारयिष्यति ते तूष्णीम्. न क्षमते भाषन्ताम्.

२.३.२.३.३.

संमतः संघेनैवंनामा प्रवारको भिक्षुः. अयं एवंनामा प्रवारको भिक्षुः संघस्य प्रवारणां प्रवारयिष्यति. क्षान्तं अनुज्ञातं संघेन. यस्मात्तूष्णीं एवं एतद्धारयामि.

२.३.३.१.

अनुपलब्ध

२.३.३.२.

अनुपलब्ध

२.३.३.३.

... समन्वाहरायुष्मन्नद्य संघस्य प्रवारणा पाञ्चदशिका. ममाप्येवंनाम्नो भिक्षोः प्रवारणा पाञ्चदशिका. सोऽहं एवंनामा भिक्षुर्भदन्ता त्रिभिः स्थानैः प्रवारयामि दृष्टेन श्रुतेन परिशङ्कया. अववदन्तु मां आयुष्मंतः. अनुशासन्तु मां आयुष्मन्तः. अनुकंपका अनुकंपका अनुकंपां उपादाय. जानं पश्यन्नापत्तिं यथाधर्मं यथाविनयं प्रतिकरिष्ये. एवं द्विरप्येवं त्रिरपि. ...

ज् २.३.३.४.

।।। प्रवारवकेन प्रवारयितव्यं ।।। ४४७३र्२).

(१५०)

ज् २.३.३.५.

।।। प्रवारयितव्यः ततः पश्चाद्भिक्षुण्यः प्रवारयन्ति ।।। ४४७३र्३).

ज् २.३.३.६.

।।। क सर्वैर्वक्तव्यं साधु प्रवारयितं ।।। ४४७३र्४).

ज् २.३.४.

।।। सित्वा । + तुं लभ्यं भदंत एवं ।।। ४४७३र्५).

ज् ३.१.

आयुष्मानुपालि बुद्धं भगवन्तं पृच्छति. कति भदंत प्रवारणाकर्मानि. चत्वार्युपालिन्. अधर्मेण कुर्वन्ति व्यग्राः. अधर्मेण समग्राः. धर्मेण व्यग्राः. धर्मेण समग्राः. (४४७३व्१).

ज् ३.२.
तत्रैकं धार्मिकं प्रवारणाकर्म यदिदं धर्मेण प्रवारयंति समग्राः. (४४७३व्२).

ज् ४.१.
अथ भगवांस्तदेव प्रवारणायां पञ्चदश्यां पुरस्ताद्भिक्षुसंघस्य प्रज्ञप्त एवासने निषण्णः. निषद्य भगवान्भिक्षूनामन्त्रयते स्म. निर्गच्छन्ति भिक्षवो रात्रिः. कुरुत भिक्षवः प्रवारणाम्. अथान्यतमो भिक्षुरुत्थायासनादेकांसं उत्तरासङ्गं कृत्वा येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तं इदं अवोचत्. अन्यतमस्मिं भदंतावासे भिक्षुराबाधिको दुःखितो बाढग्लानः. तस्यास्माभिः कथं प्रतिपत्तव्यम्. भगवानाह. प्रवारणास्यानयितव्या. उक्तं भगवता प्रवारणास्यानयितव्येति भिक्षवो न जानते कथं आनयितव्येति. भगवानाह. एकस्यैकेन द्वयोरेकेन संबहुलानां यावतां वा शक्नोति संघमध्ये नामानि परिकीर्तयितुम्. (४४७३व्३५).

(१५१)
ज् ४.२.
प्रवारणादायकस्याहं भिक्षव भिक्षोरासमुदाचारिकान्धर्मान्प्रज्ञपयिष्यामि. प्रवारणादायकेन भिक्षुणैकांसं उत्तरासङ्गं कृत्वा उपानहाववमुच्य यथावृद्धिकया सामीचीं कृत्वोत्कुटुकेन निषद्याञ्जलिं प्रणम्येदं स्याद्वचनीयम्. समन्वाहरायुष्मन्नद्य संघस्य प्रवारणा पाञ्चदशिका. ममाप्येवंनाम्नो भिक्षोः प्रवारणा पाञ्चदशिका. सोऽहं एवंनामा भिक्षुः परिशुद्धं अन्तरायिकैर्धर्मैरात्मानं वदामि. प्रवारणायां मे पारिशुद्धिं आरोचयाम्य्. आरोचितां च प्रवेदयामि. एवं द्विरप्येवं त्रिरपि.

ज् ४.३.
प्रवारणादायको भिक्षुः सचेत्कायविज्ञप्त्या प्रवारणां ददाति दत्ता प्रवारणा वक्तव्या. वाग्विज्ञप्त्या ददाति दत्ता प्रवारणा वक्तव्या. कायविज्ञप्त्या च वाग्विज्ञप्त्या च ददाति दत्ता प्रवारणा वक्तव्या. न कायविज्ञप्त्या न वाग्विज्ञप्त्या ददाति सर्वसंघेन वा तत्र गन्तव्यं स वा भिक्षुः संघमध्येऽवतारयितव्यः. न सर्वसंघस्तत्र गच्छति तं च भिक्षुं संघे नावतारयिष्यन्ति व्यग्राः कुर्वन्ति सातिसारा भवन्ति. प्रवारणादायको भिक्षुर्यथाप्रज्ञप्तानासमुदाचारिकान्धर्मान्न समादाय वर्तते सातिसारो भवति.

ज् ४.४.
प्रवारणाग्राहकस्याहं भिक्षव भिक्षोरासमुदाचारिकान्धर्मान्प्रज्ञपयिष्यामि. प्रवारणाग्राहकेन भिक्षुणा प्रवारणां गृहीत्वा न धावितव्यं न द्रवितव्यं न लङ्घयितव्यं न परिखा लङ्घयितव्या न परिषण्डा लङ्घयितव्या नोपरिविहायसा स्थातव्यं न बहिःसीमां गन्तव्यं नैकेन पादेन द्वौ

निश्रेणपदकावभिरुहितव्यौ नैकेन पादेन द्वौ सोपानकडेवरावभिरुहितव्यौ न स्वपितव्यं न समापत्तव्यम्. स्वपिति समापद्यते द्वाभ्यां कारणाभ्यां गर्हयो भवति यच्चालज्जित्वेन यच्च वैतरिकत्वेन.

ज् ४.५.

यदा संघस्थविरः कथयत्यनागमनायायुष्मन्तश्छन्दं च पारिशुद्धिं चारोचयत, आरोचितां च प्रवेदयतेति, तेनान्तरिकस्य भिक्षोः पुरतः स्थित्वा वक्तव्यम्. समन्वाहरायुष्मन्नमुष्मिन्नावासे भिक्षुराबाधिको दुःखितो बाढग्लानः. अद्य संघस्य प्रवारणा पाञ्चदशिका. (६९र्= ङBः ६.१०५४) तस्यापि भिक्षोः प्रवारणा पाञ्चदशिका. सोऽयं एवंनामा भिक्षुस् (१५२) त्रिभिः स्थानैः प्रवारयति दृष्टेन श्रुतेन परिशङ्कया. प्रवारणेऽस्य छन्दं च प्रवारणां चारोचयामि. आरोचितां च प्रवेदयामि. प्रवारणाग्राहको भिक्षुरासमुदाचारिकान्धर्मान्न समादाय वर्तते सातिसारो भवति. (GBM ६.१०५४.१२; MSV,WI ४३).

ज् ४.६.

आयुष्मानुपाली बुद्धं भगवन्तं पृच्छति. प्रवारणाग्राहकस्तावद्भदन्त भिक्षुः प्रवारणां गृहीत्वा तत्रैवोच्छिद्य कालं कुर्यात्. आनीता प्रवारणा वक्तव्या अनानीता. अनानीतोपालिन्. पुनरप्यानयितव्या. प्रवारणाग्राहकस्तावद्भदन्त भिक्षुः प्रवारणां गृहीत्वा संघमध्ये प्राप्तः कालं कुर्यात्. आनीता प्रवारणा वक्तव्या अनानीता. अनानीतोपालिन्. पुनरप्यानयितव्या. (GBM ६.१०५४.२; MSV,WI ४३).

ज् ४.७.

आगारिकत्वं प्रतिजानाति. श्रमणोद्देशकत्वं षण्ढकत्वं पण्डकत्वं भिक्षुणीदूषकत्वं मातृघातकत्वं पितृघातकत्वं अर्हद्घातकत्वं संघभेदकत्वं तथागतस्यान्तिके दुष्टचित्तरुधिरोत्पादकत्वं तीर्थिकत्वं तीर्थिकावक्रान्तकत्वं स्तेयासंवासिकत्वं नानासंवासिकत्वं असंवासिकत्वं प्रतिजानाति. आनीता प्रवारणा वक्तव्या अनानीता । अनानीता उपालिं । पुनरप्यानयितव्या. (GBM ६.१०५४.३४; MSV,WI ४३).

ज् ५.१.१.

आयुष्मानुपाली बुद्धं भगवन्तं पृच्छति । यस्मिन्भदन्तावासे एको भिक्षुः प्रतिवसति, तेन तदेव प्रवारणायां पञ्चदश्यां कथं प्रतिपत्तव्यम्. तेनोपालिन्भिक्षुणा विहारः सेक्तव्यः संमार्जितव्यः सुकुमारी गोमयकार्ष्यनुप्रदातव्या. सिंहासनं प्रज्ञपयितव्यम्*. आसनप्रज्ञप्तिः कर्तव्या. धर्मश्रवणं दातव्यम्. (GBM ६.१०५४.५६; MSV,WI ४३).

ज् ५.१.२.

ततः पश्चादुच्चतरके देशे चतुर्दिशं प्रेक्षितव्यम्.

(१५३)

ज् ५.१.३.१.

सचेत्परिशुद्धाः समानदृष्टयो भिक्षव आगच्छन्ति, त इदं स्युर् वक्तव्यास्. त्वरितत्वरितं तावदायुष्मन्त आगच्छताद्य संघस्य प्रवारणा पाञ्चदशिका. ममाप्येवंनाम्नो भिक्षोः प्रवारणा पाञ्चदशिका. सोऽहं एवंनामा भिक्षुरद्य भदन्तानां पुरतः प्रवारयामि त्रिभिः स्थानैर्दृष्टेन श्रुतेन परिशङ्कया. एवं द्विरप्येवं त्रिरपि. (GBM ६.१०५४.७; MSV,WI ४३).

ज् ५.१.३.२.

सचेत्संपद्यत इत्येवं कुशलम्. नो चेत्संपद्यते, तेन भिक्षुणा स्वासन आसद्य चित्तं इत्येवं उत्पादयितव्यं वाग्भाषितव्या. अद्य संघस्य प्रवारणा पांचदशिका. ममाप्येवंनाम्नो भिक्षोः प्रवारणा पांचदशिका. सोऽहं एवंनामा भिक्षुरद्य तावद्प्रवारणां अधितिष्ठामि. प्रवारयिष्ये दृष्टेन श्रुतेन परिशङ्कया. एवं द्विरप्येवं त्रिरपि । (GBM ६.१०५४.८९; MSV,WI ४३).

५.२.

यत्र द्वौ भिक्षू प्रतिवसतस्तत्र एष एवानुपूर्वी आन्योन्यं आरोचयितव्यम्*. यत्र त्रयो भिक्षवः प्रतिवसन्ति, तत्राप्यानुपूर्व्यान्योन्यं आरोचयितव्यम्. यत्र चत्वारो भिक्षवः प्रतिवसन्ति, तैर्ज्ञप्तिं कृत्वा प्रवारयितव्यम्. नो तु प्रवारको भिक्षुः संमन्तव्यः. (GBM ६.१०५४.९१०; MSV,WI ४३).

५.३.१.

यत्र पंच भिक्षवः प्रतिवसन्ति, तैर्ज्ञप्तिं कृत्वा प्रवारयितव्यं. प्रवारको भिक्षुः संमन्तव्यः. नो तु ग्लानस्य प्रवारणा (६९व्= GBM ६.१०५३) ग्रहीतव्या. (GBM ६.१०५४.१०; MSV,WI ४३).

(१५४

५.३.२.

यत्र षड्वोत्तरे वा भिक्षवः प्रतिवसन्ति, तैर्ज्ञप्तिं कृत्वा प्रवारयितव्यम्. प्रवारको भिक्षुः संमन्तव्यः. ग्लानस्य प्रवारणा ग्रहीतव्या.

ऊद्दान ३.

अन्तरोद्दानम्* ।।

अधार्मिकं स्थापनीयं एकवाचा प्रवारणा ।

कस्मिन्नेका हि का वाचा क्रिया उपगते हि च ।। ।।

(GBM ६.१०५३.१; MSV,WI ४४).

६.१.

एकं धार्मिकं प्रवारणास्थापनं एकं अधार्मिकम्. त्रीणी वा धार्मिकानि प्रवारणास्थापनान्येकं अधार्मिकम्. पञ्च वा धार्मिकाणि प्रवारणास्थापनान्येकं अधार्मिकम्. (GBM ६.१०५३.१; MSV,WI ४४).

६.२.१.
एकं धार्मिकं प्रवारणास्थापनं एकं अधार्मिकं कतमत्*. (GBM ६.१०५३.२; MSV,WI ४४).

६.२.२.
एकवाचिकायां प्रवारणायां वाचि भाष्यमाणायां अपर्यवसितायां प्रवारणां स्थापयति धार्मिकं प्रवारणास्थापनम्. (GBM ६.१०५३.२; MSV,WI ४४).

६.२.३.
वाचि भाषितायां पर्यवसितायां प्रवारणां स्थापयत्यधार्मिकं प्रवारणास्थापनम्.

६.२.४.
इतीम एकं धार्मिकं प्रवारणास्थापनं एकं अधार्मिकं । (GBM ६.१०५३.३; MSV,WI ४४).

(१५५)
६.३.१.)
त्रीणी वा धार्मिकानि प्रवारणास्थापनानि एकं अधार्मिकं कतमत्*. (GBM ६.१०५३.३; MSV,WI ४४).

६.३.२.१.
द्विवाचिकायां प्रवारणायां प्रथमायां वाचि भाष्यमाणायां अपर्यवसितायायां प्रवारणां स्थापयति धार्मिकं प्रवारणास्थापनम्. (GBM ६.१०५३.३; MSV,WI ४४).

६.३.२.२.
प्रथमायां वाचि भाषितायां पर्यवसितायां प्रवारणां स्थापयत्यधार्मिकं प्रवारणास्थापनम्.

६.३.२.३.
द्वितीयायां वाचि भाष्यमाणायां अपर्यवसितायायां प्रवारणां स्थापयति धार्मिकं प्रवारणास्थापनम्. (GBM ६.१०५३.४; MSV,WI ४४).

६.३.३.
द्वितीयायां वाचि भाषितायां पर्यवसितायां प्रवारणां स्थापयत्यधार्मिकं प्रवारणास्थापनम्.

६.३.४.

इतीमानि त्रीणि धार्मिकाणि प्रवारणास्थापनान्येकं अधार्मिकम्.

६.४.१.
पञ्च वा धार्मिकाणि प्रवारणास्थापनान्येकं अधार्मिकं कतमत्*. (GBM ६.१०५३.५; MSV,WI ४४).

६.४.२.१.
त्रिवाचिकायां प्रवारणायां प्रथमायां वाचि भाष्यमाणायां अपर्यवसितायां प्रवारणां स्थापयति धार्मिकं प्रवारणास्थापनम्. (GBM ६.१०५३.५; MSV,WI ४४).

६.४.२.२.
प्रथमायां वाचि भाषितायां पर्यवसितायां प्रवारणां स्थापयति धार्मिकं प्रवारणास्थापनम्.

(१५६)
६.४.२.३.
द्वितीयायां वाचि भाष्यमाणायां अपर्यवसितायां प्रवारणां स्थापयति धार्मिकं प्रवारणास्थापनं । (GBM ६.१०५३.६; MSV,WI ४४).

६.४.२.४.
द्वितीयायां वाचि भाषितायां पर्यवसितायां प्रवारणां स्थापयति धार्मिकं प्रवारणास्थापनम्. (GBM ६.१०५३.६; MSV,WI ४४).

६.४.२.५.
तृतीयायां वाचि भाष्यमाणायां अपर्यवसितायां प्रवारणां स्थापयति धार्मिकं प्रवारणास्थापनम्.

६.४.३.
तृतीयायां वाचि भाषितायां पर्यवसितायां प्रवारणां स्थापयत्यधार्मिकं प्रवारणास्थापनं. (GBM ६.१०५३.७; MSV,WI ४४).

६.४.४.
इतीमानि पञ्च धार्मिकाणि प्रवारणास्थापनान्येकं अधार्मिकम्. (GBM ६.१०५३.७; MSV,WI ४४).

७.१.
अस्त्येकवाचिका प्रवारणा, द्विवाचिका प्रवारणा, त्रिवाचिका प्रवारणा, गणप्रवारणा. कस्मिन्नर्थे एकवाचिका प्रवारणा.

ऊद्दान ४.
अन्तरोद्दानं ।।
अर्शा च वर्षा च राजा मधुरं धर्म विनिश्चयं ।
संघोऽन्तरायपतितः अयं संगृहीतो गणः ।। ।।
(GBM ६.१०५३.८; MSV,WI ४४).

७.२.१.१.१.
यथापि तत्तदेव प्रवारणायां पञ्चदश्यां सम्बहुला भिक्षवः ...

(१५७)
७.२.१.१.२.
तत्र प्रवारकस्य भिक्षोरेवं भवति. अद्य संघस्य प्रवारणा पांचदशिका । इमे च संबहुला भिक्षवः ... (GBM ६.१०५३.९; MSV,WI ४४).

७.२.१.१.३.
अहं चेत्त्रिवाचिकया प्रवारणया प्रवारयेयं, ... यन्वहं एकवाचिकया प्रवारणया प्रवारयेयम्. स एकवाचिकया प्रवारणया प्रवारयति । अस्मिन्नर्थे एकवाचिका (७०र्) प्रवारणा. (GBM ६.१०५३.१०; MSV,WI ४४).

Fओर्७.२.१.२.१७.२.१.८.१ थे Sअन्स्क्रत्तेxतोफ़् थे मनुस्च्रिप्त्(फ़ोल्. ७०) इस्लोस्त्. थे एxतन्त्तेxतिस्फ़्रों अ फ़्रग्मेन्तोफ़् थे प्रवारणावस्तु ओफ़् थे ंऊलसर्वास्तिवादिन्फ़्रों थे ठुर्फ़न्Cओल्लेच्तिओन्(Sः०ठ्वी १५७८).

७.२.१.२.१.
अपरस्मिन्नर्थ एकवाचिका प्रवारणा. यथापि तत्तदेव प्रवारणायां पञ्चदश्यां संबहुलानि भवन्ति शयनासनान्यभ्यवकाशे उपनिक्षिप्तानि. देवः प्रवर्षति ... (Sः०ठ्वी १५७८र्१).

७.२.१.२.२.
तत्र प्रवारकस्य भिक्षोरेवं भवति. अद्य संघस्य प्रवारणा पांचदशिका. सम्बहुलानि च भवन्ति शयनासनान्यभ्यवकाशे उपनिक्षिप्तानि. देवः प्रवर्षति ... (Sः०ठ्वी १५७८र्२३).

७.२.१.२.३.
अहं चेत्त्रिवाचिकया प्रवारणया प्रवारयेयं, शयनासनानि न शक्नोम्यनार्द्रम्(?) उपसंहारयितुम्(?). यन्वहं एकवाचिकया प्रवारणया प्रवारयेयम्. स एकवाचिकया प्रवारणया प्रवारयति. अस्मिन्नर्थ एकवाचिका प्रवारणा. (Sः०ठ्वी १५७८र्३४).

(१५८)

७.२.१.३.१.

अपरस्मिन्नर्थ एकवाचिका प्रवारणा. यथापि तत्तदेव प्रवारणायां पञ्चदश्यां राजा स्वकीयैः सार्धं देवीभिः कुमारैरमात्यैर्भटबलाग्रैर्निगमजानपदैरारामं आगच्छति. राज्ञा संघस्य प्रभूतो वस्त्रलाभः आमिषलाभः दत्तः. देवीभिरपि कुमारैरमात्यैर्भटबलाग्रैर्निगमजानपदैर्प्रभूतो वस्त्रलाभ आमिषलाभो दत्तः. उद्घोषकेन च भिक्षुणा उद्घोषय ... (Sःठ्वी १५७८र्४व्१).

७.२.१.३.२.

तत्र प्रवारकस्य भिक्षोरेवं भवति. अद्य संघस्य प्रवारणा पांचदशिका. राजा च स्वकीयैः सार्धं देवीभिः कुमारैः अमात्यैः भटबलाग्रैर्निगमजानपदैरारामं आगच्छति. राज्ञा संघस्य प्रभूतो वस्त्रलाभ आमिषलाभो दत्तः. देवीभिरपि कुमारैरमात्यैर्भटबलाग्रैर् निगमजानपदैः प्रभूतो वस्त्रलाभ आमिषलाभो दत्तः. उद्घोषकेन च भिक्षुना उद्घोषय ... (Sःठ्वी १५७८व्२३).

७.२.१.३.३.

अहं चेत्त्रिवाचिकया प्रवारणया प्रवारयेयं, न शक्नोमि ... प्रवारयितुम्. यन्वहं एकवाचिकया प्रवारणया प्रवारयेयम्. स एकवाचिकया प्रवारणया प्रवारयति. अस्मिन्नर्थे एकवाचिका प्रवारणा. (Sःठ्वी १५७८व्४५).

७.२.१.८.१.

अपरस्मिन्नर्थ एकवाचिका प्रवारणा. यथापि तत्तदेव प्रवारणायां पञ्चदश्यां चोरा ग्रामं निर्घातयन्ति नगरं वा निगमं वा. आरामद्वारं आगत्य गां हत्वा महिषीं छगलिकां वा रुधिराङ्गकानि रुधिरविलेखकानि कृत्वा भिक्षूणां दूतं अनुप्रेषयन्ति. निर्गच्छन्त्वार्याः. वयं अत्र वत्स्यामः.

७.२.१.८.२.

तत्र प्रवारकस्य भिक्षोरेवं भवति. अद्य संघस्य प्रवारणा पाञ्चदशिका. चोराश्च ग्रामं निर्घातयन्ति नगरं वा निगमं वा. (७१र्= GBM ६.७२४) (१५९) आरामद्वारं आगत्य गां हत्वा महिषीं छगलिकां वा रुधिरांगकानि रुधिरविलेखकानि कृत्वा भिक्षूणां दूतं अनुप्रेषयन्ति. निर्गच्छन्त्वार्याः. वयं अत्र वत्स्यामः. (GBM ६.७२४.१; MSV ईव् ११९.१३).

७.२.१.८.३.

अहं चेत्त्रिवाचिकया प्रवारणया प्रवारयेयं, स्यान्मे अतोनिदानं जीवितान्तरायः श्रामण्यान्तरायो ब्रह्मचर्यान्तरायः. यन्वहं एकवाचिकया प्रवारणया प्रवारयेयं. स एकवाचिकया प्रवारणया प्रवारयति. अस्मिन्नर्थे एकवाचिका प्रवारणा. (GBM ६.७२४.१२; MSV ईव् ११९.३६).

७.२.१.९.१.

अपरस्मिन्नर्थे एकवाचिका प्रवारणा. यथापि तत्तदेव पंचदश्यां प्रवारणायां अन्यतमेन महल्लेन बालेन मूढेनाव्यक्तेनाकुशलेन गोचरे वा गोचरमार्गे वा कुलस्त्री वा कुलकुमारी वा आक्रुष्टा भवत्याभाष्टा परामृष्टा वा. मनुष्याः प्रकुपिता आरामद्वारं आगत्य यथा गृहीतकान् उद्घोषयन्ति. गृःणंतु भवंतः श्रमणां शाक्यपुत्रीयां. हनंतु. बध्नंतु. प्रवासयंतु. राज्ञः हस्त्यारोहा भविष्यन्त्यश्वारोहा इष्टकारोहा ध्वजारोहाः पताकारोहा वा. पृथग्राजकृत्यानि राजकरणीयानि करिष्यंति. (GBM ६.७२४.२४; MSV ईव् ११९.७१४).

७.२.१.९.२.

तत्र प्रवारकस्य भिक्षोरेवं भवति. अद्य संघस्य प्रवारणा पांचदशिका. अन्यतमेन च महल्लकेन मूढेनाव्यक्तेनाकुशलेन गोचरे वा गोचरमार्गे वा कुलस्त्री वा कुलकुमारी वा आक्रुष्टा भवत्याभाष्टा परामृष्टा वा. मनुष्याः प्रकुपिताः आरामद्वारं आगत्य यथा गृहीतकानुद्घोषयंति. गृह्णंतु भवन्तः श्रमणां शाक्यपुत्रीयां. हनंतु. बध्नंतु. प्रवासयन्तु. राज्ञः हस्त्यारोहा भविष्यन्त्य् (१६०) अश्वारोहा इष्टकारोहा ध्वजारोहाः पताकारोहा वा. पृथग्राजकृत्यानि राजकरणीयानि करिष्यंति. (GBM ६.७२४.४६; MSV ईव् ११९.१४१२०.२).

७.२.१.९.३.

अहं चेत् त्रिवाचिकया प्रवारणया प्रवारयेयं, स्यान्मे अतोनिदानं जीवितान्तरायः श्रामण्यान्तरायो ब्रह्मचर्यान्तरायः. यन्वहं एकवाचिकया प्रवारणया प्रवारयेयं. स एकवाचिकया प्रवारणया प्रवारयति । अस्मिन्नर्थे एकवाचिका प्रवारणा. (GBM ६.७२४.६७; MSV ईव् १२०.२६).

७.२.१.१०.१.

अपरस्मिन्नर्थे एकवाचिका प्रवारणा. यथापि तद्विहारः अमनुष्याध्युषिते प्रदेशे प्रतिष्ठापितो भवति । अन्यतमेन च महल्लेन बालेन मूढेनाव्यक्तेनाकुशलेनाप्रतिरूपे प्रदेश उच्चारप्रस्रावं खेटं शिङ्घाणकं वान्तं विरिक्तं छोरितं अशुचिम्रक्षितं वा शयनासनं प्रविक्षिप्तं. अमनुष्याः प्रकुपिताः गोचरेऽपि तिष्ठंति गोचरमार्गेऽपि चंक्रमे ऽपि मेढ्यां अपि द्वारकोष्ठकेऽपि. भिक्षूनप्याविशंति, मञ्चानपि संपरिवर्तयन्ति. (GBM ६.७२४.७८; MSV ईव् १२०.७१२).

७.२.१.१०.२.

तत्र प्रवारकस्य भिक्षोरेवं भवति ः अद्य संघस्य प्रवारणा पांचदशिका. अयं च विहारो ऽमनुष्याध्युषिते प्रदेशे प्रतिष्ठापितः. अन्यतमेन च महल्लेन बालेन मूढेनाव्यक्तेनाकुशलेनाप्रतिरूपे प्रदेश (१६१) उच्चारप्रस्रावं खेटं शिङ्घाणकं वान्तं विरिक्तं छोरितं अशुचिम्रक्षितं वा शयनासनं प्रविक्षिप्तं. अमनुष्याः प्रकुपिता गोचरेऽपि तिष्ठन्ति गोचरमार्गेऽपि चङ्क्रमेऽपि मेढ्यां अपि द्वारकोष्ठकेऽपि. भिक्षूनप्याविशन्ति, मञ्चानपि संपरिवर्तयन्ति. (GBM ६.७२४.८९; MSV ईव् १२०.१२१४).

७.२.१.१०.३.

अहं चेत्त्रिवाचिकया प्रवारणया प्रवारयेयं, स्यान्मे अतोनिदानं जीवितान्तरायः श्रामण्यान्तरायो ब्रह्मचर्यान्तरायः. यन्वहं एकवाचिकया प्रवारणया प्रवारयेयम्. स एकवाचिकया प्रवारणया प्रवारयति. अस्मिन्नर्थे एकवाचिका प्रवारणा.

७.२.१.११.१.

अपरस्मिन्नर्थ एकवाचिका प्रवारणा. यथापि तद्विहारो व्याडाध्युषिते प्रदेशे प्रतिष्ठापितो भवति. अन्यतमेन च महल्लेन बालेन मूढेनाव्यक्तेनाकुशलेनाप्रतिरूपे प्रदेश उच्चारप्रस्रावं खेटं शिङ्घाणकं वान्तं विरिक्तं छोरितं अशुचिम्रक्षितं वा शयनासनं प्रविक्षिप्तम्. व्याडाः प्रकुपिता गोचरेऽपि तिष्ठन्ति गोचरमार्गेऽपि चङ्क्रमेऽपि मेढ्यां अपि द्वारकोष्ठकेऽपि. भिक्षूनप्याविशन्ति, मञ्चानपि संपरिवर्तयन्ति.

७.२.१.११.२.

तत्र प्रवारकस्य भिक्षोरेवं भवति. अद्य संघस्य प्रवारणा पांचदशिका. अयं च विहारो व्याडाध्युषिते प्रदेशे प्रतिष्ठापितः. अन्यतमेन च बालेन मूढेनाव्यक्तेनाकुशलेन अप्रतिरूपे प्रदेशे उच्चारप्रस्रावं खेटं शिङ्घाणकं वान्तं विरिक्तं छोरितं अशुचिम्रक्षितं वा शयनासनं प्रविक्षिप्तं. व्याडाः प्रकुपिताः गोचरेऽपि तिष्ठन्ति गोचरमार्गेऽपि चंक्रमेऽपि मेढ्यां अपि द्वारकोष्ठकेऽपि. भिक्षूनप्याविशंति, मञ्चानपि संपरिवर्तयन्ति. (GBM ६.७२४.९१०; MSV ईव् १२०.१४१८).

७.२.१.११.३.

अहं चेत् त्रिवाचिकया प्रवारणया प्रवारयेयं, स्यान्मे अतोनिदानं जीवितान्तरायः श्रामण्यान्तरायो ब्रह्मचर्यान्तरायः. यन्वहं (१६२) एकवाचिकया (७१व्= GBM ६.७२५) प्रवारणया प्रवारयेयं. स एकवाचिकया प्रवारणया प्रवारयति । अस्मिन्नर्थे एकवाचिका प्रवारणा । (GBM ६.७२४.१०७२५.१; MSV ईव् १२०.१८१२१.२).

७.२.१.१२.१.

अपरस्मिन्नर्थे एकवाचिका प्रवारणा. यथापि तद्विहारः नागाध्युषिते प्रदेशे प्रतिष्ठापितो भवति. अन्यतमेन च महल्लेन बालेन मूढेनाव्यक्तेनाकुशलेन अप्रतिरूपे प्रदेशे उच्चारप्रस्रावं खेटं शिङ्घाणकं वान्तं विरिक्तं छोरितं अशुचिम्रक्षितं वा शयनासनं प्रविक्षिप्तं. नागाः प्रकुपिताः गोचरेऽपि तिष्ठंति गोचरमार्गेऽपि चंक्रमेऽपि मेढ्यां अपि द्वारकोष्ठकेऽपि. भिक्षूनप्याविशंति मंचानपि संपरिवर्तयन्ति. (GBM ६.७२५.१३; MSV ईव् १२१.३९).

७.२.१.१२.२.

तत्र प्रवारकस्य भिक्षोरेवं भवत्य्. अद्य संघस्य प्रवारणा पांचदशिका. अयं च विहारः नागाध्युषिते प्रदेशे प्रतिष्ठापितः. अन्यतमेन च महल्लेन बालेन मूढेनाव्यक्तेनाकुशलेन

अप्रतिरूपे प्रदेशे उच्चारप्रस्रावं खेटं शिङ्घाणकं वान्तं विरिक्तं छोरितं अशुचिम्रक्षितं वा शयनासनं प्रविक्षिप्तं. नागाः प्रकुपिताः गोचरेऽपि तिष्ठंति गोचरमार्गेऽपि चंक्रमेऽपि मेढ्यां अपि द्वारकोष्ठकेऽपि । भिक्षूनप्याविशंति । मंचानपि संपरिवर्तयंति. (GBM ६.७२५.३४; MSV ईव् १२१.९१५).

७.२.१.१२.३.

अहं चेत् त्रिवाचिकया प्रवारणया प्रवारयेयं, स्यान्मे अतोनिदानं जीवितान्तरायः श्रामण्यान्तरायो ब्रह्मचर्यान्तरायः. यन्वहं एकवाचिकया प्रवारणया प्रवारयेयं. स एकवाचिकया प्रवारणया प्रवारयति । अस्मिन्नर्थे एकवाचिका प्रवारणा. (GBM ६.७२५.४५; MSV ईव् १२१.१५१९).

७.२.१.१३.१.

अपरस्मिन्नर्थे एकवाचिका प्रवारणा. यथापि तद्विहारः दावमध्ये प्रतिष्ठापितो भवति. अग्निर्मुक्त इत्यग्निर् ग्रामनिगमराजराष्ट्रधानीं दहं परैति. गोचरं अपि दहति गोचरमार्गं अपि चंक्रमम् (१६३) अपि मेढीं अपि द्वारकोष्ठकं अपि. विहारं अपि दहति विहारसामन्तकं अपि. (GBM ६.७२५.५६; MSV ईव् १२१.२०१२२.३).

७.२.१.१३.२.

तत्र प्रवारकस्य भिक्षोरेवं भवति । अद्य संघस्य प्रवारणा पांचदशिका ः अयं च विहारो दावमध्ये प्रतिष्ठापितः. अग्निर्मुक्त इत्यग्निर् ग्रामनिगमराजराष्ट्रधानीं दहं परैति. गोचरं अपि दहति गोचरमार्गं अपि चंक्रमं अपि मेढीं अपि द्वारकोष्ठकं अपि. विहारं अपि दहति विहारसामन्तकं अपि. (GBM ६.७२५.६७; MSV ईव् १२२.३७).

७.२.१.१३.३.

अहं चेत् त्रिवाचिकया प्रवारणया प्रवारयेयं, स्यान्मे अतोनिदानं जीवितान्तरायः श्रामण्यान्तरायः ब्रह्मचर्यान्तरायः. यन्वहं एकवाचिकया प्रवारणया प्रवारयेयं. स एकवाचिकया प्रवारणया प्रवारयति. अस्मिन्नर्थे एकवाचिका प्रवारणा ।। (GBM ६.७२५.७८; MSV ईव् १२२.७११).

७.२.१.१४.१.

अपरस्मिन्नर्थे एकवाचिका प्रवारणा. यथापि तद्विहारः अनूपमध्ये प्रतिष्ठापितो भवति । उपरि पर्वतसंक्षेपे स्थूलबिन्दुको देवो वर्षं ग्रामनिगमराजराष्ट्रधानीं वहं परैति. गोचरं अपि वहति । गोचरमार्गं अपि चंक्रमं अपि मेढीं अपि द्वारकोष्ठकं अपि. विहारं अपि संस्वेदयति. (GBM ६.७२५.८९; MSV ईव् १२२.१२१६).

७.२.१.१४.२.

तत्र प्रवारकस्य भिक्षोरेवं भवत्य्. अद्य संघस्य प्रवारणा पांचदशिका. अयं विहारोऽनूपमध्ये प्रतिष्ठापितः. उपरि पर्वतसंक्षेपे स्थूलबिन्दुको देवो वर्ष ग्रामनिगमराजराष्ट्रधानीं वहन्परैति. गोचरं अपि वहति गोचरमार्गं अपि चंक्रमं अपि मेढीं अपि द्वारकोष्ठकं अपि. (७२र्= GBM ६.७२६) विहारं अपि संस्वेदयति. (GBM ६.७२५.९७२६.१; MSV ईव् १२२.१६२०).

(१६४)

७.२.१.१४.३.

अहं चेत्त्रिवाचिकया प्रवारणया प्रवारयेयं, स्यान्मे अतोनिदानं जीवितान्तरायः श्रामण्यान्तरायो ब्रह्मचर्यान्तरायः. यन्वहं एकवाचिकया प्रवारणया प्रवारयेयं. स एकवाचिकया प्रवारणया प्रवारयति. अस्मिन्नर्थे एकवाचिका प्रवारणा । (GBM ६.७२६.१; MSV ईव् १२२.२०१२३.२).

७.२.२.

कस्मिन्नर्थे द्विवाचिका प्रवारणा. यत्र तृतीयायां वाच्यवकाशो न भवति । तत्र द्विवाचिकया प्रवारणया प्रवारयति । अस्मिन्नर्थे द्विवाचिका प्रवारणा । (GBM ६.७२६.१२; MSV ईव् १२३.३४).

७.२.३.

कस्मिन्नर्थे त्रिवाचिका प्रवारणा. समावस्थायाः. (GBM ६.७२६.२; MSV ईव् १२३.५).

७.३.

कस्मिन्नर्थे गणप्रवारणा. यथापि तद्भयं भवति । अटवीं संक्षोभाश्चक्रसमारूढा जनपदास्तेन तेऽन्वाहिण्डन्ति. तत्र भिक्षुभिर्चीवरविसिकासु चीवरं च कुण्डीं बद्ध्वा अन्योन्यं अवलोक्य प्रक्रमितव्यं. अद्यायुष्मन्तः संघस्य प्रवारणा पांचदशिका । यदा संघसामग्रीं लप्स्यामः तदा प्रवारयिष्यामः. अस्मिन्नर्थे गणप्रवारणा. (GBM ६.७२६.२३; MSV ईव् १२३.६१०).

(१६५)

८.१.

आयुष्मानुपाली बुद्धं भगवन्तं पृच्छति. यथापि तद्भदंत भिक्षव इदं एवंरूपं कृयाकारं कृत्वा वर्षां उपगच्छंति । यस्यास्माकं आयुष्मन्तोऽन्तर्वर्षे ज्ञातिरागच्छेद्, दातव्या प्रवारणा ः देया भदन्त प्रवारणा न देया. देया उपालिं । (GBM ६.७२६.३४; MSV ईव् १२३.१११३).

८.२.१२.

Sअन्स्क्रतेxत्हस्बीनोमित्तेदिन्थे मनुस्च्रप्त्

९.१.१.

सचेद्वस्तुं स्थापयेत्* न पुद्गलं, देया प्रवारणा न देया. नोपालिं. स इदं स्याद्वचनीयः. न वयं आयुष्मन्नित्यर्थं सन्निषण्णाः सन्निपतिताः. कस्मादायुष्मं वस्तुं स्थापयेर् न पुद्गलं. अपि त्वात्मविशुद्ध्यर्थं प्रवारणा उक्ता भगवता. सचेदाकांक्षसि, प्रवारय. (GBM ६.७२६.४५; MSV ईव् १२३.१३१७).

९.१.२.

सचेत्पुद्गलं स्थापयति न वस्तुं । देया प्रवारणा न देया । नोपालिं । स इदं स्याद्वचनीयः. न वयं आयुष्मन्नित्यर्थं सन्निषण्णाः सन्निपतिताः. कस्मादायुष्मं पुद्गलं स्थापयेर् न वस्तुम्. अपि त्वात्मविशुद्ध्यर्थं प्रवारणा उक्ता भगवता. सचेदाकांक्षसि, प्रवारय ः (GBM ६.७२६.५६; MSV ईव् १२३.१८१२४.१).

९.१.३.

सचेद्वस्तुं स्थापयति पुद्गलं च, देया प्रवारणा न देया. नोपालिं. स इदं स्याद्वचनीयः ... (GBM ६.७२६.६; MSV ईव् १२४.१२).

९.१.४.

... एतानाकारान् स्थापयित्वा ः । । । । (GBM ६.७२६.६; MSV ईव् १२४.२३).

(१६६)

ऊद्दान ५.

उद्दानम्* । ।

भिक्षुं च राजा गृह्णाति स्मरेच्च दशिकाभिश्च ।

आपत्त्याः सप्तिकां कुर्याच्चोदनां हि च सप्तकां । । । ।

(GBM ६.७२६.६७; MSV ईव् १२४.४५).

९.२.

यथापि तत्तदेव प्रवारणायां पंचदश्यां भिक्षू राज्ञा गृहीतो भवति चोरैर्वा धूर्तैर्वा वधकैः प्रत्यर्थिभिः प्रत्यमित्रैः. तस्य भिक्षुभिर्दूतोऽनुप्रेषयितव्यः. मुंचैनं भिक्षुं. सब्रह्मचार्येषोऽस्माकं. सचेन्मुंचतीत्येवं कुशलं. नो चेन्मुंचति, द्वितीयो दूतोऽनुप्रेषयितव्यः । मुंचैनं भिक्षुम्. अस्त्यस्माकं अनेन सार्धं किंचिदेव करणीयं. सचेन्मुंचतीत्येवं कुशलं. नो चेन्मुंचति, भिक्षुभिर्मण्डलकं गत्वा प्रवारयितव्यं. ततः पश्चाद् द्वितीये दिवसे तस्य भिक्षोर् मोक्षायोद्युञ्जितव्यं. सचेदुद्युञ्जन्तीत्येवं कुशलं. नो चेदुद्युंजन्ति सातिसारा भवंति. (GBM ६.७२६.७९; MSV ईव् १२४.६१४).

९.३.१.

यथापि तत्तदेव प्रवारणायां पंचदश्यां भिक्षुरापत्तिं स्मरति. तेन भिक्षुणा सापत्तिर् भिक्षोः पुरस्ताद्यथाधर्मं प्रतिकर्तव्या ः ततः पश्चात्प्रवारयितव्यं. एवं हि प्रवारयितव्यं. न त्वेवाहं प्रवारणाया अन्तरायं वदामि । पूर्ववद्यावद्यथा पोषधवस्तुन्येवं विस्तरेण दशिका कर्तव्या । (GBM ६.७२६.९१०; MSV ईव् १२४.१५१९).

९.३.२.१.

यथापि तत्तदेव प्रवारणायां पंचदश्यां भिक्षुरापत्तिं प्रतिजानाति. (GBM ६.७२६.१०; MSV ईव् १२४.२०२१).

(१६७)

९.३.२.२.

सचेत्पाराजिकां प्रतिजानाति । नाशयित्वा प्रवारयितव्यं. (GBM ६.७२६.१०; MSV ईव् १२४.२१२२).

९.३.२.३.

सचेत्संघावशेषां प्रतिजानाति, अधिष्ठाय प्रवारयितव्यं. (GBM ६.७२६.१०; MSV ईव् १२४.२२).

९.३.२.४.

सचेत्पायन्तिकां प्रतिदेशनीयां (७२व्= GBM ६.७२७) दुष्कृतां प्रतिजानाति । देशयित्वा प्रवारयितव्यं. (GBM ६.७२६.१०७२७.१; MSV ईव् १२५.१२).

९.३.३.१.

यथापि तत्तदेव प्रवारणायां पञ्चदश्यां वस्त्वविदितं भवति. केचिन्निरवशेषसंज्ञिनः, केचित्सावशेषसंज्ञिनः. तत्र ये निरवशेषसंज्ञिनस्तैर्नाशयित्वा प्रवारयितव्यं. ये सावशेषसंज्ञिनस्तैरधिष्ठाय प्रवारयितव्यं । (GBM ६.७२७.१; MSV ईव् १२५.३५).

९.३.३.२.

यथापि तत्तदेव प्रवारणायां पंचदश्यां आपत्तिरविनिश्चिता भवति । केचिद् देशनाकरणीयं इत्याहुः । केचित्संवरणीयं इत्याहुः । तत्र ये देशनाकरणीयं इत्याहुः तैर्देशयित्वा प्रवारयितव्यम्. ये संवरणीयं इत्याहुः तैस्संवरणं कृत्वा प्रवारयितव्यं । (GBM ६.७२७.१२; MSV ईव् १२५.६९).

१०.१.१.१.

यथापि तत्तदेव प्रवारणायां पंचदश्यां भिक्षुर्भिक्षुं चोदयति. सचेच्चोदकः न कायेन संवृतो भवति न वाचा । एवंरूपं चोदकं आमर्दयित्वा प्रमर्दयित्वा प्रवारयितव्यं । (GBM ६.७२७.३; MSV ईव् १२५.१०१२).

१०.१.१.२.

सचेच् चोदकः कायेन संवृतो भवति न वाचा ः एवंरूपं अपि चोदकं आमर्दयित्वा प्रमर्दयित्वा प्रवारयितव्यं । (GBM ६.७२७.३४; MSV ईव् १२५.१२१४).

(१६८)

१०.१.१.३.

सचेच्चोदकः वाचा संवृतो भवति न कायेन, एवंरूपं अपि चोदकं आमर्दयित्वा प्रमर्दयित्वा प्रवारयितव्यं. (GBM ६.७२७.४; MSV ईव् १२५.१४१५).

१०.१.२.१.

सचेच् चोदकः कायेन संवृतो भवति वाचा च, न सूत्रधरो न विनयधरो न मातृकाधर, एवंरूपं चोदकं आज्ञपयित्वा संज्ञपयित्वा प्रवारयितव्यं । (GBM ६.७२७.४५; MSV ईव् १२५.१६१८).

१०.१.२.२.

सचेच् चोदकः कायेन संवृतो भवति वाचा च, सूत्रधरो विनयधरो मातृकाधरः, न सूत्रव्यक्तो न विनयव्यक्तः न मातृकाव्यक्तो, एवंरूपं अपि चोदकं आज्ञापयित्वा संज्ञापयित्वा प्रवारयितव्यम्. (GBM ६.७२७.५; MSV ईव् १२५.१८१२६.१).

१०.१.२.३.

सचेच्चोदकः कायेन संवृतो भवति वाचा च, सूत्रधरो विनयधरो मातृकाधरो, सूत्रव्यक्तो विनयव्यक्तो मातृकाव्यक्तो, न सूत्रकोविदो न विनयकोविदो न मातृकाकोविदः, एवंरूपं अपि चोदकं आज्ञपयित्वा संज्ञपयित्वा प्रवारयितव्यं । (GBM ६.७२७.५६; MSV ईव् १२६.१२).

१०.१.२.४.

सचेच् चोदकः कायेन संवृतो भवति वाचा च, सूत्रधरो विनयधरो मातृकाधरः, सूत्रव्यक्तो विनयव्यक्तो मातृकाव्यक्तः । सूत्रकोविदो विनयकोविदो मातृकाकोविदः, न सूत्रकुशलो न विनयकुशलः न मातृकाकुशलः, एवंरूपं अपि चोदकं आज्ञपयित्वा संज्ञपयित्वा प्रवारयितव्यं । (GBM ६.७२७.६७; MSV ईव् १२६.२६).

१०.१.३.

सचेच्चोदकः कायेन संवृतो भवति वाचा च, सूत्रधरो विनयधरो मातृकाधरः, सूत्रव्यक्तो विनयव्यक्तो मातृकाव्यक्तः, सूत्रकोविदो विनयकोविदो मातृकाकोविदः, सूत्रकुशलो

विनयकुशलो मातृकाकुशलः, किं तु संचिन्त्य संघमध्ये अधर्मं धर्मतो दीपयति धर्मं चाधर्मतः, अविनयं विनयतो दीपयति विनयं चाविनयतः, एवंरूपं अपि चोदकं आज्ञपयित्वा संज्ञपयित्वा प्रवारयितव्यं । (GBM ६.७२७.७८; MSV ईव् १२६.७१२).

(१६९)

१०.१.४.

सचेच्चोदकः कायेन संवृतो भवति यावत्* सचेन् न संचिन्त्य संघमध्ये अधर्मं धर्मतो दीपयति धर्मं चाधर्मतः, अविनयं विनयतो दीपयति विनयं चाविनयतः, एवंरूपं अपि चोदकं आज्ञपयित्वा संज्ञपयित्वा प्रवारयितव्यं. (GBM ६.७२७.८९; MSV ईव् १२६.१३१६).

१०.२.१.१.

सचेच्चोदकः कायेन संवृतो भवति वाचा च, सूत्रधरो विनयधरो मातृकाधरः, सूत्रव्यक्तः विनयव्यक्तः मातृकाव्यक्तः । सूत्रकोविदः विनयकोविदः मातृकाकोविदः । (७३र्= GBM ६.७२८) सूत्रकुशलो विनयकुशलो मातृकाकुशलः, न संचिन्त्य संघमध्ये अधर्मं धर्मतो दीपयति धर्मं चाधर्मतः, अविनयं विनयतो दीपयति विनयं चाविनयतः. स इदं स्याद्वचनीयः. (GBM ६.७२७.९७२८.१; MSV ईव् १२६.१७२१).

१०.२.१.२.

वदायुष्मं. चोदकेन वदसि पाराजिकया संघावशेषया पायन्तिकया प्रतिदेशनीयया दुष्कृतया, रात्रिकृतेन दिवसकृतेन पथकृतेनोत्पथकृतेन, गच्छतस्तिष्ठतो निषण्णस्य निपन्नस्य. (GBM ६.७२८.१२; MSV ईव् १२६.२११२७.२).

१०.२.२.१.

सचेत्पाराजिकया, न संघावशेषया न पायन्तिकया न प्रतिदेशनीयया न दुष्कृतया, सचेत्संघावशेषया, न पाराजिकया न पायन्तिकया न प्रतिदेशनीयया न दुष्कृतया, सचेत्पायन्तिकया, न पाराजिकया न संघावशेषया न प्रतिदेशनीयया न दुष्कृतया. सचेत्प्रतिदेशनीयया, न पाराजिकया न संघावशेषया न पायन्तिकया न दुष्कृतया. सचेद्दुष्कृतया, न पाराजिकया न संघावशेषया न पायन्तिकया न प्रतिदेशनीयया. (GBM ६.७२८.२३; MSV ईव् १२७.२९).

(१७०)

१०.२.२.२.१.

सचेत्प्रथमया पाराजिकया, न द्वितीयया न तृतीयया न चतुर्थिकया, सचेद् द्वितीयया न प्रथमया न तृतीयया न चतुर्थिकया, सचेत् तृतीयया न प्रथमया न द्वितीयया न चतुर्थिकया, सचेच् चतुर्थिकया न प्रथमया न द्वितीयया न तृतीयया. (GBM ६.७२८.४; MSV ईव् १२७.१०१४).

१०.२.२.२.२.

सचेत्प्रथमया संघावशेषया न द्वितीयया न यावत्त्रयोदशमिकया ः सचेद्यावत्त्रयोदशमिकया न प्रथमया न द्वितीयया न तृतीयया यावन्न द्वादशमिकया. (GBM ६.७२८.४५; MSV ईव् १२७.१४१६).

१०.२.२.२.३.

सचेत्प्रथमया पायन्तिकया, न द्वितीयया यावन्न नवतिमया, सचेन्नवतिमया न प्रथमया न द्वितीयया यावन्नैकोननवतिमया । (GBM ६.७२८.५६; MSV ईव् १२७.१६१८).

१०.२.२.२.४.

सचेत्प्रथमया प्रतिदेशनीयया न द्वितीयया न तृतीयया न चतुर्थिकया । सचेद् द्वितीयया न प्रथमया न तृतीयया न चतुर्थिकया, सचेत्तृतीयया न प्रथमया न द्वितीयया न चतुर्थिकया ः सचेच्चतुर्थिकया न प्रथमया न द्वितीयया न तृतीयया । (GBM ६.७२८.६; MSV ईव् १२७.१८१२८.१).

१०.२.२.२.५.

सचेत्प्रथमया दुष्कृतया न द्वितीयया न तृतीयया न यावद् अन्तिमया । सचेदन्तिमया न प्रथमया न द्वितीयया यावन्नोपान्तिमया. (GBM ६.७२८.६७; MSV ईव् १२८.१३).

१०.२.२.३.

सचेद्रात्रिकृतेन न दिवसकृतेन, सचेद्दिवसकृतेन न रात्रिकृतेन, सचेदुत्पथकृतेन न पथकृतेन, सचेत्पथकृतेन नोत्पथकृतेन, सचेद्(१७१) गच्छतः न तिष्ठतः न निषण्णस्य न निपन्नस्य, सचेत् तिष्ठतः न गच्छतः न निषण्णस्य न निपन्नस्य, सचेन्निषण्णस्य न गच्छतो न तिष्ठतो न निपन्नस्य, सचेन्निपन्नस्य न गच्छतः न तिष्ठतः न निषण्णस्य. (GBM ६.७२८.७८; MSV ईव् १२८.४९).

१०.२.३.१.

सचेच्चोदकः एवं साधु च सुष्ठु च समनुयुज्यमानः समनुशास्यमानः समनुगाह्यमानः स्थानास्थानं संक्रामति, अचोदकः स्यात्*. अचोदितस्स्यात्*. सचेच् चोदकः स्थानास्थानं न संक्रामति, चोदकः स्यात्* ।। (GBM ६.७२८.८९; MSV ईव् १२८.१०१३).

१०.२.३.२.

सचेच्चोदकः स्थानास्थानं न संक्रामति चोदित इदं स्याद्वचनीयं. वदायुष्मं. के ते तस्मिं समये कायसंस्कारा वाक्संस्कारा मनःसंस्कारा. (GBM ६.७२८.९१०; MSV ईव् १२८.१३१५).

१०.३.१.

सचेत्पाराजिकां प्रतिजानाति, नाशयित्वा प्रवारयितव्यं. (GBM ६.७२८.१०; MSV ईव् १२८.१५१६).

१०.३.२.
सचेत्संघावशेषां प्रतिजानाति, अधिष्ठाय प्रवारयितव्यं. (GBM ६.७२८.१०; MSV ईव् १२८.१६१७).

१०.३.३.
सचेत्पायन्तिकां प्रतिदेशनीयां दुष्कृतां प्रतिजानाति, देशयित्वा प्रवारयितव्यं ः । । । । (GBM ६.७२८.१०; MSV ईव् १२८.१७१८).

ऊद्दान ६.
उद्दानम्* । ।
महापेयालो गृह्णाति (७३व्= GBM ६.७२९)) स्थापनं हि च पंचिकां ।
गमिकेन त्रयं कुर्यात्परिशुद्धानां प्रवारणा । । । ।
(GBM ६.७२८.१०७२९.१; MSV ईव् १२८.१९२०).

(१७२)
११.१.
यथापि तत्तदेव प्रवारणायां पञ्चदश्यां नैवासिका भिक्षवः सन्निषण्णा भवन्ति सन्निपतिताः पंच वा उत्तरे वा. तेषां एवं भवति. सन्ति भिक्षवो येऽनागतका इति. येऽनागतकाः कल्पत्यस्माकं तैर्विना ज्ञप्तिं कृत्वा प्रवारयितुं, ते कल्पार्थिनः कल्पनिष्कारा ज्ञप्तिं कृत्वा प्रवारयन्ति. (GBM ६.७२९.१२; MSV ईव् १२८.२११२९.३).

११.२.
ततः पश्चान् नैवासिका भिक्षवः सन्निषण्णाः सन्निपतिता आगच्छंत्यल्पतरकास्. तैः पुनरपि ज्ञप्तिं कृत्वा प्रवारयितव्यं. पूर्विका भिक्षवः सातिसाराः कल्पसामन्तकाः. (GBM ६.७२९.२३; MSV ईव् १२९.३५).

११.३.
पूर्ववद्यावद्यथा पोषधवस्तुन्येवं यथोक्ता उद्दानगाथा वाच्यं. एकस्तु विशेषः. तत्र नैवासिका भिक्षवः सन्निषण्णाः सन्निपतिताः चत्वारो वा उत्तरे वा, इहापि वाच्यं पंच वा उत्तरे वेति ः । । । । (GBM ६.७२९.३; MSV ईव् १२९.५८).

ऊद्दान ७.
उद्दानं । ।

वर्षोपगतका भिक्षून् ज्ञात्वा कलहकारकां ।
साखिल्यकेन प्रत्युद्गम्य नियतं चातुर्मासिकी ।
ग्लानकश्च वस्तु च वर्गो भवति यः समुद्दितः ।। ।।
(GBM ६.७२९.३४; MSV ईव् १२९.९११).

१२.१.१.
आयुष्मानुपाली बुद्धं भगवन्तं पृच्छति । यथापि तद्भदंत वर्षोपगता भिक्षवः शृण्वन्ति. भिक्षवः आगच्छन्ति कलहकारका भण्डनकारका विग्रहकारका विवादकारका आधिकरणिकाः. तेऽस्माकं चोदयिष्यंति स्मारयिष्यंति अलज्जितायो वैतरिकत्वेन. तैस्तेषां कथं प्रतिपत्तव्यं. तैरुपालिं भिक्षुभिर्द्वे त्रीणि वा पोषधकर्माण्यतिक्रम्य प्रवारयितव्यं. (GBM ६.७२९.४५; MSV ईव् १२९.१२१७).

(१७३)
१२.१.२.
सचेत्संपद्यतेऽत्येवं कुशलं. नो चेत्संपद्यते, तैर्भिक्षुभिर्द्वौ त्रयो वा आपदर्थिका मण्डलकाः संमन्तव्याः. (GBM ६.७२९.५६; MSV ईव् १२९.१७१९).

१२.२.१.
सचेत्संपद्यतेऽत्येवं कुशलं. नो चेत्संपद्यते, वाक्साखिल्यकेन प्रत्युद्गम्य पात्रचीवरं प्रतिग्रहीतव्यं. पात्रचीवरेणामोहयित्वा प्रमोहयित्वा प्रवारयितव्यं. (GBM ६.७२९.६; MSV ईव् १२९.१९१३०.१).

१२.२.२.) ठेxतिन्ठिबेतनोन्ल्य्; Sअन्स्क्रत्तेxतोमित्तेद्

१२.२.३.
सचेत्संपद्यतेऽत्येवं कुशलं. नो चेत्संपद्यते, धर्मश्रवणं दातव्यम्*. धर्मश्रवणेनामोहयित्वा प्रमोहयित्वा प्रवारयितव्यं. (GBM ६.७२९.६७; MSV ईव् १३०.१३).

१२.३.
सचेत्संपद्यतेऽत्येवं कुशलं. नो चेत्संपद्यते, तैरुपालिं भिक्षुभिर्मण्डलकं कृत्वा पोषधः कर्तव्यः. (GBM ६.७२९.७; MSV ईव् १३०.३५).

१२.४.
सचेत्त एवं वदेयुः. अद्यायुष्मन्तस्संघस्य प्रवारणा पांचदशिका. कस्माद्यूयं पोषधं कुरुत्हेति. त इदं स्युर्वचनीयाः. आगन्तुका यूयं आयुष्मन्तो. नैवासिका भिक्षवोऽनेनार्थेन. तेषां एवं भवति । नियतं आयुष्मतां चातुर्मासिकी प्रवारणा भविष्यतीति । ततः

पश्चात्तैर्गतवेगैर्गतप्रत्यर्थिभिः पुनरपि प्रवारयितव्यं ः । । (GBM ६.७२९.७९; MSV ईव् १३०.५१०).

१३.१.
यथापि तत्तदेव प्रवारणायां पंचदश्यां ग्लानः अग्लानस्य प्रवारणां स्थापयति. ग्लान इदं स्याद्वचनीयः. आगमय त्वं आयुष्मं. ग्लानस्त्वं अप्रयोगक्षमः. (GBM ६.७२९.९; MSV ईव् १३०.१११३).

१३.२.
यथापि तत्तदेव प्रवारणायां पञ्चदश्यां अग्लानः ग्लानस्य प्रवारणां (१७४) स्थापयति. अग्लान इदं स्याद्वचनीयः. आगमय त्वं आयुष्मं. ग्लानोऽसावप्रयोगक्षमः. (GBM ६.७२९.९१०; MSV ईव् १३०.१३१५).

१३.३.
यथापि तत्तदेव प्रवारणायां पञ्चदश्यां ग्लानः ग्लानस्य दूतेन प्रवारणां स्थापयति. दूत इदं स्याद्वचनीयः. आगमय त्वं आयुष्मं. ग्लानोऽसावप्रयोगक्षमः. (GBM ६.७२९.१०; MSV ईव् १३०.१६१८).

१३.४.
यथापि तत्तदेव प्रवारणायां (७४र्) पञ्चदश्यां अग्लानो ग्लानस्य प्रवारणां दूतेन स्थापयति. दूत इदं स्याद्वचनीयः. आगमय त्वं आयुष्मन्. ग्लानोऽसावप्रयोगक्षमः. (GBM ६.७२९.१०; MSV ईव् १३०.१८).

फ़ोलिओ ७४ इस्लोस्त्, थेरेफ़ोरे थे Sअन्स्क्रत्तेxतोफ़् १४.१ तो १४.२.४ इस्नोतेxतन्त्.